चारं, क्ली, ( चर्य्यते भक्ष्यते कोपदेशादिवशादिति। चर+कर्म्मणि घञ्।) कृत्रिमविषम्। इति हेमचन्द्रः। ३। ३६८॥

चारः, पुं, पियालवृक्षः। गतिः। बन्धः। अवसर्पः। इति मेदिनी। रे, ३३॥ कारागारम्। इति हेमचन्द्रः। ३। ३६८॥ ( चर एव इति स्वार्थे अण्।) गूढ़पुरुषः। चरः। तद्विवरणम्। यदुक्तं कालिकापुराणे ८५ अध्याये।

"कृषिदुर्गञ्च वाणिज्यं खन्यानां करसाधनम्।
आदानं सैन्यकरयोर्बन्धनं गजवाजिनोः॥
शून्यवप्रसुखानाञ्च योजनं सततं जनैः।
प्रजानां सारसेतूनां बन्धनं चेति चाष्टमम्॥
एतदष्टासु वर्गेषु चारान् सम्यक् प्रयोजयेत्।
कार्य्याकार्य्यविभागाय चाष्टवर्गाधिकारिणाम्॥
अष्टौ चारान् नियुञ्जीयादष्टवर्गेषु पार्थिवः।
दशस्वन्येषु युञ्जीत क्रमतः शृणु तानि मे॥
स्वामी सचिवराष्ट्राणि मित्रं कोषो बलं तथा।
दुर्गन्तु सप्तमं ज्ञेयं राज्याङ्गं गुरुभाषितम्॥
दुर्गयुक्तं चाष्टवर्गं चारं नात्मनि योजयेत्।
तस्मादिमानि शेषाणि पञ्च चारपदानि तु॥
शुद्धान्तेष्वेव पुत्त्रेषु सूपकारादौ महानसे।
शत्रूदासीनयोश्चैव बलाबलविनिश्चये॥
आदौ दशसु चैतेषु चारान् राजा प्रयोजयेत्।
नयात् प्रकाशं जानीयात् तत्तु चारैर्निरूपयेत्॥
निरूप्य तत्प्रतीकारमवश्यं छिद्रतश्चरेत्।
यथानियोगमेतेषां यो यो यत्रान्यथा चरेत्॥
ज्ञात्वा तत्र नृपश्चारैर्दण्डयेद्वा नियोजयेत्।
चारांस्तु मन्त्रिणा सार्द्धं रहस्ये संस्थितो नृपः॥
प्रदोषसमये पृच्छेत्तदानीमेव साधयेत्।
स्वपुत्त्रे चाथ शुद्धान्ते ये तु चारा महानसे॥
नियुक्तांस्तान् मध्यरात्रौ पृच्छेत् यश्चापि मन्त्रिणि।
एतान् चारान् स्वयं पश्येत् नृपतिर्मन्त्रिणा विना॥
अन्यांश्च मन्त्रिणा सार्द्धं निरूप्य प्रदिशेत् फलम्।
नैकवेशधरश्चारो नैको नोत्साहवर्ज्जितः॥
संस्तुतो न हि सर्व्वत्र नातिदीर्घो न वामनः।
सततं न दिवाचारी न रोगी नाप्यबुद्धिमान्॥
न वित्तविभवैर्हीनो न भार्य्यापुत्त्रवर्ज्जितः।
कार्य्यश्चारो नृपतिना गुह्यतत्त्वविनिर्णये॥
अनेकवेशग्रहणक्षमं भार्य्यासुतैर्युतम्।
बहुदेशवचोऽभिज्ञं पराभिप्रायवेदकम्॥
दृढ़भक्तं प्रकुर्व्वीत चारं शक्तमसाध्वसम्।
अधितिष्ठेत् स्वयं राजा कृषिमात्मसमैस्तथा॥
वणिक्पथे च दुर्गादौ तेषु शक्तान्नियोजयेत्।
अन्तःपुरे पितुस्तुल्यान् धीरान् वृद्धान् नियोजयेत्॥
षण्डान् पण्डान् तथा वृद्धान् स्त्रियो या बुद्धितत्पराः।
शुद्धान्तद्वारि युञ्जीयात् स्त्रियो वृद्धा मनीषिणीः॥"

यथा च युक्तिकल्पतरौ।
"नृपो निहन्याच्चारेण परराष्ट्रं विचक्षणः।"
( कापटिकपुरुषादयः। यथा, मनुः। ७।१८४।
"उपगृह्यास्पदञ्चैव चारान् सम्यग्विधाय च॥"
"चारांश्च कापटिकादीन्।" इति कुल्लूकभट्टः॥
प्रचारः। यथा, रामायणे। २। ६६। २६।
"निवृत्तचारः सहसा गतो रविः
प्रवृत्तचारा रजनी ह्युपस्थिता।"
"निवृत्तचारः निवृत्तकिरणप्रचारः प्रवृत्तचारा प्रवृत्ततमःप्रचारा।" इति तट्टीकायां रामानुजः॥ वाणिज्यादिव्यवहारः। यथा, महाभारते। ५। ३८। १२।
"भृतैर्वाणिज्यचारश्च पुत्त्रैः सेवेत च द्विजान्॥"
सञ्चारः। प्रवृत्तिः। यथा, देवीभागवते। १। ११। २२।
"न स्त्री दुष्यति चारेण न विप्रो वेदकर्म्मणा।"
"चारेण रजःसञ्चारेण।" इति टीकाकृन्नीलकण्ठः॥ )

चारकः, पुं, ( चारयति इति। चर+णिच्+ण्वुल्।) अश्वादेः पालकः। सञ्चारकः। (यथा, रामायणे। ३। ६६। १८।
"इयं मृते भ्रातरि मे मयि वत्स्यति मैथिली।
न चाहमाशां कुर्य्यां ते पाप! प्रच्छन्नचारक!॥")
बन्धः। इति मेदिनी॥ के, ८७। पियालवृक्षः। इति राजनिर्घण्टः॥ ( चर एव स्वार्थे अण् चारः। ततः स्वार्थे कन्। गुप्तचरः। यथा महाभारते। २।५।३८।
"त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि [चारकैः॥"
चरणशीले, त्रि। यथा, कथासरित्सागरे।१४।६५।
"गुप्तं विरचितां नाम भेजेऽन्तःपुरचारिकाम्॥")

चारटिका, स्त्री, ( चर+णिच्+"शकादिभ्योऽटन्।" ४। ८१। उणां। इति अटन् ततः संज्ञायां कन् कापि अत इत्वञ्च। ) नलीनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

चारटी, स्त्री, (चर+णिच्+"शकादिभ्योऽटन्।" इति अटन् ततो गौरादित्वात् ङीष्।) पद्मचारिणीवृक्षः।. इत्यमरः। २। ४। १४६॥ भूम्यामली। इति राजनिर्घण्टः॥

चारणः, पुं, ( चारयति प्रचारयति नृत्यगीतादिविद्यां तज्जन्यकीर्त्तिं वा। चर+णिच्+ल्युः।) नटविशेषः। तत्पर्य्यायः। कुशीलवः। इत्यमरः। २। १०। १२॥ ( यथा, मनुः। १२। ४४।
"चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः।
रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः॥"
"चारणाः नटादयः।" इति कुल्लूकभट्टः॥")
गन्धर्व्वविशेषः। यथा,—
"गन्धर्व्वाणां ततो लोकः परतः शतयोजनात्।
देवानां गायनास्ते च चारणाः स्तुतिपाठकाः॥"
इति पाद्मे पातालखण्डम्॥
(देवयोनिविशेषः। यथा, भागवते। २। १। ३६।
"गन्धर्व्वविद्याधरचारणाप्सरः
स्वरःस्मृतीरसुरानीकवीर्य्यः॥"
चारपुरुषः। यथा, भागवते। ४। १६। १२।
"अन्तर्वहिश्च भूतानां पश्यन् कर्म्माणि चारणैः।
उदासीन इवाध्यक्षो वायुरात्मेव देहिनाम्॥")

चारभटः, पुं, ( चारेषु चरेषु भटः। यद्वा, चारे बुद्धिकौशलादिप्रचारे भटः। ) वीरः। इति हेमचन्द्रः। ३।२८॥ (यथाह भर्त्तृहरिः। १।६१।
"कश्चुम्बति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि।
चारभटचौरचेटकनटविटनिष्ठीवनशरावम्॥")

चारवायुः, पुं, (चारेण सूर्य्यस्योदग्गतिभेदेन प्रेरितो यो वायुः। ) निदाघजवायुः। इति त्रिकाण्डशेषः॥

चारिणी, स्त्री, ( चारयति स्वगुणमिति। चर+णिच्+णिनिः ङीप् च। ) करुणीवृक्षः। इति राजनिर्घण्टः॥

चारित्रं, क्ली, ( चरित्रमेव इति। स्वार्थे अण्। ) चरित्रम्। इति हेमचन्द्रः। ३। ५००॥ (यथा, रामायणे। ३। ५६। ६।
"कुलाक्रोशकरं लोके धिक्! ते चारित्रमीदृशम्॥"
मरुद्गणानामन्यतमः। यथा, हरिवंशे। १६६।५४।
"जयोनश्चाकृतिश्चैव चारित्रं बहुपन्नगम्॥"
चरतीति। "चरेर्वृत्ते।" ४। १७२। उणां। इति णित्रम्। वृत्तान्तम्॥)

चारित्रा, स्त्री, ( चारित्रं अम्लस्वभावो विद्यतेऽस्या इति। अच् टाप्।) तिन्तिड़ीवृक्षः। इति शब्दरत्नावली॥

चारी, स्त्री, ( चारः पदनिक्षेपभेदः गतिभेदो वा अस्त्यस्यामिति। "अर्श आदिभ्योऽच्।" ५।२।१२७। इत्यच्। ततो ङीष्।) नृत्याङ्गविशेषः। यथा,—
"न हि चारीं विना नृत्ये नृत्यस्याङ्गं प्रवर्त्तते।
शृङ्गारादिरसानान्तु भावोद्दीपनकारिका॥
माधुर्य्योद्वर्त्तिना नित्यं चारी चारुगतिर्म्मता॥"
अन्ये तु।
"एकपादप्रचारो यः सा चारी तु निगद्यते।
पादयोश्चारणं यच्च सा चारीति निगद्यते॥
करणानां समायोगः खण्डकः परिकीर्त्तितः।
त्रिभिः खण्डैश्चतुर्भिर्व्वा मण्डलं समुदाहृतम्॥
समनखा नूपुरविद्धा तिर्य्यङ्मुखी सवला च।
कातरा च कुवीरा च विश्लिष्टा रथचक्रिका॥
पार्ष्णिरेचितका तलदर्शिनी गजहस्तिका।
पराविद्धतला चोरुताड़िताप्यर्द्धमण्डला॥
स्तम्भक्रीड़निका हरिणत्रासिका चोरुरेचिका।
तलोद्वृत्ता सञ्चरिता स्फुरिकापि तथैव च॥
लङ्घितजङ्घा सङ्घट्टिता स्यादथ मदालसा।
उत्कुञ्चितातितिर्य्यक्कुञ्चिता चापकुञ्चिता॥
षड्विंशतिर्भौमचार्य्य इत्याख्याता मनीषिभिः॥"
अन्ये तु।
"समपादस्थिता वर्णा शकटास्याध्यर्द्धिकापि च।
विथाधा ताड़िता बद्धा एड़का क्रीड़िता तथा॥
ऊरुवृत्ता छन्दिता जनितापस्यन्दिता तथा।
स्यन्दितावत्समतन्वी समोत्सारितमञ्जिता॥
उच्छन्दिता च विज्ञेयाश्चार्य्यः षोड़श भूमिगाः।"
इति भूमिचारी॥ * ॥

आकाशचारी यथा,—
"चारीश्चाकाशगा वर्ण्ये विक्षेपा लघरी तथा।
अङ्घ्रिताड़िता भ्रमरी पुरःक्षेपा च सूचिका॥